# Gangatarangah

# ગઙ્ગાતરઙ્ગઃ

## Document Information

Text title : Gangatarangah

File name : gangAtarangaH.itx

Category : devii, nadI, devI

Location : doc_devii

Author : mayUrapaNDitAnujasUnabAlakavi

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Latest update : November 3, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2019

*sanskritdocuments.org*

# Gangatarangah

# ગઙ્ગાતરઙ્ગઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીગઙ્ગે ભાગીરથિ શ્રીશઙ્કરમૌલિમાલતીમાલે ।
કરુણાવતિ જય ભગવતિ પાહિ કૃપાપાઙ્ગતઃ શિવસદયે ॥ ૧॥

પઙ્ક્તાવુપવિષ્ટાનાં સર્વેષાં તર્પણં સમં ન્યાય્યમ્ ।
મમ તુ શ્રોત્રં તૃપ્તં ગઙ્ગે ! રીતિઃ કથં ત્વદીયેયમ્ ॥ ૨॥

સર્વેન્દ્રિયસૌહિત્યં યથા ભવિષ્યતિ તથા લઘુ વિધેયમ્ ।
અદ્યાવધિ યજ્જાતં જાતં ગઙ્ગે ! ત્વયા દયા કાર્યા ॥ ૩॥

દયનીયોઽયં ગઙ્ગે સર્વૈર્ધર્માદિભિઃ પરિત્યક્તઃ ।
યામિ શરણં કમધુના ત્વયા વિના વ્રાત્યરાજોઽહમ્ ॥ ૪॥

પૂર્વં સમુદ્ધૃતઃ કતિ સંપ્રત્યુદ્ધર્તુમનલસાસિ ત્વમ્ ।
અગ્રે સમુદ્ધરિષ્યસિ તન્મધ્યે માદૃશો નૈવ ॥ ૫॥

પૂર્વં ન ચૈવ માદૃઙ્ નોચેદાનીં પુરઃ કુતો ભવિતા ।
ઇતિ સઙ્ખ્યાતુમનલસા ભવ ભવતિ જાહ્નવિ ત્રિપથગે ત્વમ્ ॥ ૬॥

પાપિન ઉદ્ધર્તું ત્વં બદ્ધપરિકરા શ્રુતં મનીષિભ્યઃ ।
ઇત્થં સતિ મદ્વિષયે ગઙ્ગે કેયં પ્રમીલા ત્વમ્ ॥ ૭॥

પ્રાક્કર્મ પચેલિમતામાપ્તમિદાનીન્તને જનુષિ ।
ઇતિ વિદિતમહો ગઙ્ગે પ્રોત્કા યત્સેવનાય ધિષણેયમ્ ॥ ૮॥

તવ ભવતુ નમસ્કારો મદ્વિષયે દેવિ ! ભો નમસ્તુભ્યમ્ ।
કરુણાવતિ જય ગઙ્ગે પાહિ કૃપાપાઙ્ગદૃષ્ટિપાતૈઃ ॥ ૯॥

કતિચિદ્ બ્રુવન્તિ વિન્દું નિતમ્બમાત્રં ચ જાનુદઘ્નં ચ ।
કેચિદ્ ગુલ્ફદ્વયસમ્ભવસિન્ધું દેવતાન્તરાશ્રયણાત્ ॥ ૧૦॥

તવ સંશ્રયાદ્ધિ ગઙ્ગે ભવસિન્ધોરસ્તિતાં ન મન્યેઽહમ્ ।

અથવા મન્યે ભ્રમં ખેનગરઃ શશવિષાણમંશુજલમ્ ॥ ૧૧॥

શરદાં પઞ્ચસહસ્રી તવસ્થિતેર્માનમિતિ વિદામાજ્ઞા ।
ગઙ્ગે યદવધિ વિદિતા તદવધિ માં પીડ્યત્યધીરત્વમ્ ॥ ૧૨॥

યસ્મિન્કસ્મિન્ હિ ભવે તિર્યશ્ચિત્વં સમુદ્ધરિષ્યસિ મામ્ ।
ઇતિ સત્યમથાપ્યસ્મિઁશ્ચરમભવે પાસિ ચેચ્ચમત્કારઃ ॥ ૧૩॥

વીચીપતિતં સર્વા નદ્યઃ સન્તારયન્તિ કિં ચિત્રમ્ ।
ત્વમવીચીપતિતમપિ હિ ગઙ્ગે સન્તારયસ્યહો ચિત્રમ્ ॥ ૧૪॥

વંશાનુત્પાદયસિ ત્વં વર્દ્ધયસે તથૈવ જીવયસિ ।
રક્ષસિ વિસ્તારયસિ સ્વસ્મિન્પતિતં હિ તારયસિ ॥ ૧૫॥

સદ્વંશભવે વંશોદ્ધારિણિ ગઙ્ગે નમસ્કરોમિ ત્વામ્ ।
વંશ્યમપિ દીનં દ્વિજં કિં ત્વં નાદ્યાપિ તારયસિ ॥ ૧૬॥

નો તારયસિ હિ માં ચેન્મા તારય દેવિ ભોઃ સ્વતન્ત્રા ત્વમ્ ।
મજ્જયસિ તર્હિ મજ્જય ગઙ્ગે સ્વસ્મિન્સુગણ્ડશૈલમિવ ॥ ૧૭॥

મા માસ્તુ મદુદ્ધારો નૈવ ત્વામર્થયે કદાચિદપિ ।
ક્ષુદ્રં યાદોજાતં વિધાય માં સ્થાપયાશુ નિજજઠરે ॥ ૧૮॥

યદ્યપિ યાદઃ ક્ષુદ્રં ચરતિ મહચ્ચેત્તથાપિ મદનુમતિઃ ।
કિં તવ ગતમત્ર પરં મજ્જય નામાશુ મા વિધેહિ ચિરમ્ ॥ ૧૯॥

ભવસિન્ધૌ મજ્જાયા વિભ્યતિ તાભ્યઃ સુવિદ્વાંસઃ ।
નાહં વિભેમિ માતર્ભવસિન્ધૌ ત્વયિ મમાસ્તુ મજ્જૈવઃ ॥ ૨૦॥

લક્ષ્મીનાથં ત્યક્ત્વા મત્વા શ્લાધ્યં કપર્દિસમ્બન્ધમ્ ।
ગઙ્ગે ભૂમૌ વિચરસ્યતઃ કપર્દ્યસ્મિ દૃગ્વિષયઃ ॥ ૨૧॥

ગોમૂર્ત્યશ્વત્થાદીનિતરત્ર ત્વં કુરુષ્વ મા મામ્ભોઃ ।
કૃમિમશકવેતસાદીન્ પ્રવિધાય સ્થાપયાશુ નિજજઠરે ॥ ૨૨॥

સગરાનુદ્ધર્તુમના ભૂરન્ધ્રપ્લાવનં કૃતવતી ત્વમ્ ।
સગરોઽસ્મિ બહુલરન્ધ્રઃ પ્લાવયસિ ન માં સુરાપગે કિમિતિ ॥ ૨૩॥

સુરસઙ્ગાત્સુરધુનિતા પ્રાપ્તા યાતા તથાપિ નોક્ષરતા ।
ભૂસુરસઙ્ગાદધિકૈકાક્ષરતાપ્તિઃ કથં ન સા ક્રિયતે ॥ ૨૪॥

ત્વન્મજ્જનમેવ પરં શ્લાઘ્યં માન્યં શ્રુતેર્વચોઽસ્માકમ્ ।
નાન્યત્રામરમુક્તાવલિનીરાજિતપદં પદં શાક્રમ્ ॥ ૨૫॥

અચ્યુતપદચ્યુતાપિ હિ દાતું નૈનં પદં સ્વતન્ત્રા ત્વમ્ ।
કાઽન્યેદૃશી દ્વિતીયા સ્વપદભ્રષ્ટા સતી તદર્પયિતુમ્ ॥ ૨૬॥

દોષત્રયાપનુત્યૈ ત્રિવિધા મર્ત્યાસ્ત્વયિ પ્રમજ્જન્તિ ।
દ્વિચતુર્દશદોષાઢ્યાંસ્તાંસ્ત્વં કુરુષે કથં ત્વેતત્ ॥ ૨૭॥

કશ્ચિત્કઞ્ચિચ્છ્રયતેત્યાધિક્યં લબ્ધુમિતિ જનસ્થિત્યામ્ ।
ભૂતં ચતુર્વિધં ત્વં ત્રિવિધં કુરુષે કથં ગઙ્ગે ! ॥ ૨૮॥

અમ્બ ! ત્વદ્દર્શનતો મુક્તિર્ન સ્નાનજં ફલં જાને ।
ઇતિ યદ્વદતિ વિપશ્ચિત્તદલીકઃ સ્નાનતસ્ત્રિમૂર્તિત્વમ્ ॥ ૨૯॥

ત્રિગુણાંશં પઙ્ક્તુમાર્ષ્ટિં કર્તું મર્ત્યાસ્ત્વયિ પ્રમજ્જન્તિ ।
તાનવિશેષેણ ત્વં કરોષિ નિજલીલયા ત્રિગુણમૂર્તીન્ ॥ ૩૦॥

ગઙ્ગે નશ્યતિ જનનં ત્વન્મજ્જનતો વદન્તિ તદલીકમ્ ।
જન્તુનિવહો નિમજ્જઁસ્ત્વયિ ભવતિ હિ શઙ્કરો વિધિર્વિષ્ણુઃ ॥ ૩૧॥

સ્વર્ગાદધઃ પતન્તી સ્વોર્ધ્વં ગઙ્ગે નિમજ્જતો નયસિ ।
સોઢ્વાઽપિ વિપદ્ગણમથ સન્તઃ પરકાર્યસાધને વ્યગ્રાઃ ॥ ૩૨॥

ગઙ્ગાપ્રાર્થનાતરઙ્ગો ગઙ્ગાચરણે સમર્પિતઃ શિશુના ।
સગુણો વિગુણો વા સ્તાં શ્રાવ્યં કલભાષણં હિ શિશોઃ ॥ ૩૩॥

ઇતિ શ્રીમદાર્યાચાર્યમયૂરપણ્ડિતાનુજસૂનબાલકવિરચિતો
ગઙ્ગાર્થનાતરઙ્ગઃ શિવાય ભૂયાત્ ॥

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Gangatarangah*

pdf was typeset on November 3, 2019

Please send corrections to *sanskrit@cheerful.com*